कञ्चित् कालमनुवर्त्तत एव। अपि च नैवात्र विवदितव्यं ब्रह्मविदः कञ्चित् कालं शरीरं ध्रियते न ध्रियते वा इति। कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणञ्चापरेण प्रतिक्षेप्तुं शक्येत? श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्द्देशेनैतदेव निरुच्यते। तस्मादनारब्धकार्य्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात् क्षय" इति भा०।

**अपूर्ब्बता** स्त्री अपूर्ब्बस्य अन्यतोऽप्राप्तस्य भावः तल्। १ प्रमाणान्तरागम्यत्वे "उपक्रमोपसंहारावभ्यासोऽपूर्ब्बता फलम् अर्थवादोपपत्तिश्च हेतुस्तात्पर्य्यनिर्णये २ इत्युक्ते तात्पर्य्यावधारणहेतुभेदे च यथा छान्दोग्ये "तन्त्वौपनिषदं वेदेति ब्रह्मणो मानान्तरागम्यत्वमुक्तम्।

**अपूर्ब्बपति** स्त्री न पूर्ब्बः पतिर्य्यस्याः। कुमार्य्याम्। "अपूर्ब्बपतिं कुमारीमिति" सि०कौ०।

**अपूर्ब्बवाद** पु० अपूर्ब्बमधिकृत्य वादः तत्त्वबुभुत्सोः कथा। गङ्गेशोपाध्यायकृते शब्दचिन्तामण्यन्तर्गते ग्रन्थभेदे।

**अपूर्ब्बविधि** पु० अपूर्ब्बे प्रमाणान्तरेणाप्राप्ते विधिर्विधानम् वि+धा–कि। अप्राप्तप्रापके लिङादिपदवेदनीये शब्दविशेषे। यथा स्वर्गकामो यजेतेति लिङादियुक्तं वाक्यं प्रमाणान्तरेणाप्राप्तस्य स्वर्गसाधनत्वस्य यागे बोधयत् तथा। अपूर्ब्बविधिरपि चतुर्विधः कर्म्मविधिः गुणविधिः विनियोगविधिः प्रयोगविधिश्चेति। तत्र अग्निहोत्रं जुहोति इत्यादौ यागरूपे कर्म्मणि इष्टसाधनतायाः, कृतिसाध्यताया, भावनाया वा मतभेदेन बोधनात् कर्म्मविधित्वम्। द्रव्यदेवतादिविधायकविधिर्गुणविधिः। यथा दध्ना जुहोत्यादिवाक्यं प्राप्तस्याग्निहोत्रस्यानुवादेनाप्राप्तगुणरूपद्रव्यादेर्विधानात्। "ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यादि ऐन्द्र्या ऋचः गार्हपत्योपस्थाने विनियोजनात् विनियोगविधिः। एवं कृत्वा एवं कुर्य्यादित्यादि प्रयोगज्ञापकोविधिः प्रयोगविधिः। यथा अधीत्य स्नायादित्यादि 'उपसद्भिश्चरित्वा मासमेकमग्निहोत्रं जुहोत्यादि च अयञ्च विशिष्टविधिरिति भेदः।

**अपूर्ब्य** त्रि० न पूर्ब्बमर्हति यत् न०त०। पूर्ब्बानर्हे "त्वं नो वायवेषामपूर्ब्यः सोमानामिति" ऋ० १,१३४,६।

**अपृक्त** त्रि० पृच–क्त न०त०। १ असंबद्धे "अपृक्त एकाल् इति पाणिन्युक्ते वर्णान्तरायुक्ते २ एकवर्णे "वेरपृक्तस्य पा०

**अपृथक्** अव्य० न पृथक्। सहयोगे पूर्बापरयोरेकादेशरूपे सम्भूयभवने पृथक्साहित्यमपृथक्साहित्यञ्चेति साहित्यं द्विविधमिति वृद्धाः।

**अपेक्षणीय** त्रि० अप+ईक्ष–कर्म्मणि अनीयर्। १ अनुरोद्धव्ये अपेक्षाकर्म्मणि २ प्रतिपाल्ये च "आत्मा यत्नेन रक्ष्योरणशिरसि पुनः सोऽपि नापेक्षणीय" इति नीति०।

**अपेक्षा** स्त्री अप+ईक्ष–भावे अ। १ आकाङ्क्षायां, सा च शाब्दबोधजनिका "यत्पदेन विना यस्यानुभावकता भवेदित्युक्ता तत्पदे पदवत्त्वरूपा। अपेक्षायाञ्च प्रायशोवृत्तिर्नेष्यते "सापेक्षे प्रत्ययो न स्यात् समासो वा कथञ्चन। सापेक्षं तद्विजानीयादसमस्तविशेषणम्" यथा प्रवीरं पुत्रकाम्यति ऋद्धस्य राजमातङ्ग इत्यादौ प्रत्ययसमासौ न स्तः। "सापेक्षत्वेऽपि गमकत्वात् समास" इति भाष्योक्तेः देवदत्तस्य गुरुकुलमित्यादौ समासः इति भेदः। १ प्रयोजकत्वे तच्च ज्ञाने स्थितौ उत्पत्तौ वा इतरस्यानुरोधित्वम् ज्ञानादिकार्य्ये च यस्य यत्पदार्थान्तरज्ञानाद्यनुरोधः तस्य तदपेक्षा। अतएव तर्कग्रन्थे जगदीशेन "स्वापेक्षापादकः प्रसङ्ग आत्माश्रयः अपेक्षा च ज्ञप्तावुत्पत्तौ स्थितौ च ग्राह्येत्यभिधाय एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यं स्यादेतद्घटज्ञानभिन्नं स्यादिति ज्ञप्तौ। घटोऽयं यद्येतद्घटजनकः स्यात् एतद्घटभिन्नः स्यादिति उत्पत्तौ, अयं घटः यद्येतद्घटवृत्तिः स्यात् तथात्वेनोपलभ्येतेति स्थितौ च" स्वापेक्षापेक्षितत्वे उदाहृतम्। अनतिदूरे च "अपेक्षा चात्र साक्षात्परम्परासाधारणी ग्राह्ये"त्युक्तम्। तेन साक्षात् परम्परया वा स्वज्ञानादिप्रयोजकतैवापेक्षेति निष्कर्षः। स्वग्रहसापेक्षग्रहसापेक्षग्रहकत्वमन्योन्याश्रयलक्षणम्। २ अनुरोधे "सत्यामपि तपःसिद्धौ नियमापेक्षया मुनिः" रघुः। ४ स्पृहायाञ्च "समुगोढेषु कामेषु निरपेक्षः परिव्रजेदिति" "अध्यात्मरतिरासीत निरपेक्षोनिरामिष इति" च मनुः। "निरपेक्षः विगतस्पृह इति" कुल्लूकभट्टः।

**अपेक्षाबुद्धि** स्त्री अयमेकः अयमेक इत्याकारिकायाम् अनेकैकत्वविषयिण्यां "अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरिष्यते भाषा० परिभाषितायाम् बुद्धौ।

**अपेक्षाबुद्धिज** त्रि० अपेक्षाबुद्धितो जायते जन–ड ५त०। न्यायोक्ते द्वित्वादिपरार्द्धान्ते संख्याभेदे। "द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः अपेक्षाबुद्धिनाशाच्च नाशस्तेषां प्रकीर्त्तित" इति भाषा०। अत्रायमभिसन्धिः। यद्यपि द्वित्वादि समवायः प्रत्येकं घटादावस्ति तथापि एकोद्वाविति ज्ञानाभावात् एको न द्वाविति ज्ञानाच्च द्वित्वादीनां पर्य्याप्तिस्वरूपः कश्चित् संबन्धोऽनेकाश्रयोऽङ्गीक्रियते पर्य्याप्तिसंबन्धेन च

BAH U